International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(4): 07-08
© 2016 IJSR
www.anantaajournal.com
Received: 05-05-2016
Accepted: 06-06-2016

**RV Venkata Ramana**
Simha, Ph.D. Scholar, Dept. of Sanskrit, S. V University. Tirupathi, Andhra Pradeh, India.

**Correspondence**
**RV Venkata Ramana**
Simha, Ph.D. Scholar, Dept. of Sanskrit, S. V University. Tirupathi, Andhra Pradeh, India.

# काशीखण्डे विन्ध्यदमन कथा

## RV Venkata Ramana

मनसः शान्तये शुद्धये च तीर्थयात्रा उपयुज्यते। यत्र क्षेत्रं, तीर्थं, दैवं इति त्रितयस्य समागमो भवति तत्र प्रयोजनाधिक्यं भवतीति आस्तिकाः तादृशं क्षेत्रं सेवितुमिच्छन्ति। पूर्वं यैः कैरपि प्रसिद्धैः सेवितं इति श्रृतं चेत् तत्र विशेष गौरवं दर्शयन्ति। तच्च केवलं माहात्म्यं अर्थवादमात्रं माभूदिति भक्तेषु पुराणानि तत्तत् क्षेत्र सेवकानां महात्मनां चरितं वर्णयन्ती। काशी क्षेत्रे विश्वेश्वरः दैवं, क्षेत्रं प्रलये अपि न नष्टं, गङ्गा तीर्थमिति त्रितयस्य समागमः वर्तते।

**महिमा वर्णनम**
प्रथमार्थे काशीखण्डे पञ्चाशत् अध्यायाः वर्तन्तेः। मध्ये कथा विच्छेदः माभूदिति उत्तरार्थात् अष्टौ अध्यायाः अपि अस्मिन्नेव पूर्वार्थ प्रसङ्गे निरूपिताः। अथ उपाख्यानानां काश्या सम्बन्धनिरूपणार्थं तत्र विस्तरेणोक्ता काशीमहिमा प्रत्युपाख्यानं निरूप्यते।

**विन्ध्य दमनम**
काश्याः महत्वं वक्तुं अगस्त्यस्य प्रस्तावः न अपेक्षितः अपेक्षितोऽपि अगस्त्यः स्कन्दं द्रष्टुं कैलासं गतवान। प्रसंग वशेन स्कन्दः काशीमहिमानं उक्तवान् इति मात्र कथनेन विन्ध्य दमन कथां विनैव काश्याः महिमा प्रतिपादयितुं शक्य एव। तथापि किमर्थं महर्षिः एवं संकल्पितवान।
विन्ध्यदमन कथा महर्षिणा न केवलं कल्पिता। पुरा वृत्ता कथैव महर्षिणा अत्रापि काश्याः महिम्नः प्रकाशनार्थं गृहीता। काशीखण्डे नारदेन उद्दीपितः विन्ध्यः सूर्यं रुरोध। तन्निवारणार्थं ब्रह्मणा आदिष्टाः देवाः अगस्त्यं शरणं ययुः। तावत् पर्यन्तं काश्यां कृतनिवासः अगस्त्यः लोकहितार्थं काशीं त्यक्तवान् न स्वेच्छया इति वचनात् काशी वियोग दुःखवर्णनं अधिकं शोभते। अतः तत् प्रसङ्गे यद्यत् महिमा अनुस्मरण पूर्वकं वर्णनं भवति तत् सत्यं भवतीति वक्तुं शक्यते। तस्मिन् उपाख्याने स्थलद्वये काश्याः महिम्नः वर्णनं दृश्यते। देवाः ब्रह्मणा आज्ञप्ताः तमेव पुरस्कृत्य प्रथमं अगस्त्याश्रमं आजग्मुः। तत्र देवैः स्वयं वर्णितः काश्याः महिमा पञ्चविंशति श्लोकेषु [1]निरुपितः। स च महिमा एवं रूपः।
काशिवासिनः मृगाः पक्षिणोऽपि लोकोत्तराः। देवानां अपि पुनः जन्मभयं भवति न पुनः एतेषां भवति। काश्यां वर्तमानः चण्डालो।पि देवेभ्यः उत्तमः। यतः देवाः पूर्वकृत पुण्यैः स्वर्गं प्राप्य क्षीणे पुण्ये पुनः मर्त्यलोके जन्म प्राप्नुवन्ति।

तेतं भुक्त्वा स्वर्गलोकं विशालं।

क्षीणे पुण्ये मर्त्यलोकं विशन्ति।। इति स्मृतिः प्रसिद्धैव। स्वर्गिणां स्वर्गात् पतनभयं भवति। काशिवासिनां पुनः पतनभयं जन्मादिरूपं नास्ति। योगिथिरपि काशिवासिना मशकेनापि प्राप्यं पदं अलभ्यमेव। इन्द्रपदं ब्रह्मणः पदं लोकपाल पदं इति सर्वमपि केनापि कालप्रमाणेन नश्वरमेव। किन्तु काशिवास जन्यं फलं अनश्वरम। जन्मान्तर सहस्रेण कृतेनैव पुण्येन काशीवासः लभ्यते। आलस्येनापि भक्तः विश्वेश्वरालयं गत्वा अश्वमेध फलं प्राप्नोति। गंगायां स्नात्वा सन्ध्यां उपास्य विश्वेश्वर दर्शनेन शिवकथा श्रवणेन च मुक्तो भवति। सर्वार्थ प्रदाता भवानी सर्वकामप्रदः ढुंढिविनायकः विश्वेश्वर समीपे वर्तन्तौ भक्तानां अभीष्टं पूरयतः। एवं देवकृत महिमा वर्णनेन काशी देवैरपि प्रार्थ्यते इत्यर्थापत्या तन्महत्वम् निरूपितम।

विन्ध्यदमने काशीवियोगेन अगस्त्य विलापः

अगस्त्यः निर्गतेषु देवेषु काशीवियोगजन्यं दुःखं शोदुमशक्तः बहुधा विललाप। काश्याः प्रतिष्ठासुः स्वमनोगतं दुःखं लोपामुद्रां प्रत्युक्त्वा किंचित् न्यूनीकर्तुं कृतयत्नः।

[2]स्वे जनस्य हि दुःख मग्रतो विवृतद्वार मिवोपजायते।
[3]पूरोत्पीडे तटाकस्य परीवाह प्रतिक्रिया।
शोकक्षोभे च हृदयं प्रलापैरेव धार्यते।।

इति लोकनयमनुसृत्य अगस्त्यो।पि शोकेन प्रलापेन च आत्मानं धारयितुं ऐच्छत। लोपामुद्रा दर्शनेन स शोकः हृदयं निर्भिद्य बहिरागतः। सः लोपामुद्रां काशीमहिमानं एवं उक्तवान।
दण्डधरादयो देवाःविन्ध्यदमने अशक्ताः किं? किन्तु मम पूर्वकृत अपुण्यमेव काशीवियोगः कारणं जातम। अविमुक्तं क्षेत्रं कदापि न मोक्तव्यं विशेषतः मोक्षार्थी कदापि काश्याः न बहिः गच्छेत् काशीवासे नित्यं विघ्नाः भवन्ति एव इति पुराणेषु श्रूयते। स एव अन्तरायः मम इदानीं उपस्थितः अहमपि तं अन्तरायं अन्यथा कर्तुं न समर्थः काशीं विहाय मोक्षेच्छया अन्यतोगमनं मुर्खाणां कार्यं भवति। करस्थं अन्नकबलं स्वयं विसृज्य क्षुत् शान्तये यः स्व हस्तं लेढि तद्वद् अहमपि देशान्तरं गच्छामि।
मुमुक्षुः एवं किं करोति कन्दान्वेषिणः जले मग्नाः मधुरं शालूककन्दादिं कदाचिदेव लभन्ते। कष्टलब्धं तं कन्दं त्यक्त्वा पुनः यत्नकरणे साफल्यं यथा न भवति तथा सकृदपि लब्धे काशीवासे तत् त्यागः न पुनः काशीप्राप्तये भवति। एवं काशीवासं लब्ध्वा यः त्यजति स मूढ एव। पापनिवारिकां गंगामपि त्यक्त्वा अन्यत्र गमनं मूर्खाणां कार्यमेव। पुरुषार्थेषु धर्मः क्षेत्रान्तरेष्वपि साध्यः। मोक्षः पुनः काश्यामेव साध्यः। तस्मिन्नेव सन्दर्भे अगस्त्यः काशीवासं योगतुल्यं उक्तवान। असिः इडानादिः वरणा पिंगला नगरी सुषम्ना। इडायां पिंगलायां वा प्रविष्टो वायुः प्राणायामेन सुषम्नायां यदि प्रवेश्यते तदा योगसिद्धिः भवति मुक्तश्च भवति। प्राणात्ययकाले परमेश्वरः स्वयं मरिष्यमाणस्य जन्तोः कर्णे तारकं मन्त्रं उपदिशति। अतः अन्तकः तथाविधान् स्प्रष्टुं न शक्नोति। एवं परमेश्वरेण कृतोपदेशाः काश्यां मृताः न पुनः भवं प्राप्नुवन्तीति वेदप्रमाणमपि तत्रोदाहृतम्।

[4]स होवाचेति जाबालिरारुणोऽसिरिडा मता।
वरणापिङ्गलानाडी तदन्तस्त्वविमुक्तकम।।

एवं बहुधा अनुभूतशोकः अगत्स्यः लोपामुद्राद्वितीयः दक्षिणदेशं प्रस्थितः। मार्गमध्ये विन्ध्यः अगत्स्यं दृष्वा अवनतः कुब्जः इव बभूव। सूर्यश्च यथा पूर्वं चलितः। अगत्स्यः यावात् मम पुनरागमनं भविष्यति तावत् त्वया एवमेव वामनेन भाव्यमिति विन्ध्यमुत्क्वा दक्षिण दिशां जगाम न पुनरागतश्च।

**पाद टिप्पणी**
1. काशीखण्डः प्र,भा अ 3/ 75 – 98 श्लोकाः
2. कुमारसम्भवम् स 4 श्लोकाः 7
3. उत्तररामचरितम् – तृ अ 29 श्लोकाः
4. काशीखण्डः प्र,भा 5/ 25–27 श्लोकाः

**सन्दर्भग्रन्थसूचि**
1. काशीखण्डः
2. स्कन्दपुराणम्